योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ०७

सप्तमः सर्गः ७

श्रीवाल्मीकिरुवाच ।

तच्छ्रुत्वा राजसिंहस्य वाक्यमद्भुतविस्तरम् ।

हृष्टरोमा महातेजा विश्वामित्रोऽभ्यभाषत ।। १

सदृशं राजशार्दूल तवैवैतन्महीतले ।

महावंशप्रसूतस्य वसिष्ठवशवर्तिनः ।। २

यत्तु मे हृद्गतं वाक्यं तस्य कार्यविनिर्णयम् ।

कुरु त्वं राजशार्दूल धर्मं समनुपालय ।। ३

अहं धर्मं समातिष्ठे सिद्ध्यर्थं पुरुषर्षभ ।

तस्य विघ्नकरा घोरा राक्षसा मम संस्थिताः ।। ४

यदा यदा तु यज्ञेन यजेऽहं विबुधव्रजान् ।

तदा तदा तु मे यज्ञं विनिघ्नन्ति निशाचराः ।। ५

बहुशो विहिते तस्मिन्मया राक्षसनायकाः ।

अकिरंस्ते महीं यागे मांसेन रुधिरेण च ।। ६

अवधूते तथाभूते तस्मिन्यागकदम्बके ।

कृतश्रमो निरुत्साहस्तस्माद्देशादुपागतः ।। ७

न च मे क्रोधमुत्स्रष्टुं बुद्धिर्भवति पार्थिव ।

तथाभूतं हि तत्कर्म न शापस्तस्य विद्यते ।। ८

ईदृशी यज्ञदीक्षा सा मम तस्मिन्महाक्रतौ ।

त्वत्प्रसादादविघ्नेन प्रापयेयं महाफलम् ।। ९

त्रातुमर्हसि मामार्तं शरणार्थिनमागतम् ।

अर्थिनां यन्निराशत्वं सत्तमेऽभिभवो हि सः ।। १०

तवास्ति तनयः श्रीमान्दृप्तशार्दूलविक्रमः ।

महेन्द्रसदृशो वीर्ये रामो रक्षोविदारणः ।। ११

तं पुत्रं राजशार्दूल रामं सत्यपराक्रमम् ।

काकपक्षधरं शूरं ज्येष्ठं मे दातुमर्हसि ।। १२

शक्तो ह्येष मया गुप्तो दिव्येन स्वेन तेजसा ।

राक्षसा येऽपकर्तारस्तेषां मूर्धविनिग्रहे ।। १३

श्रेयश्चास्य करिष्यामि बहुरूपमनन्तकम्।

त्रयाणामपि लोकानां येन पूज्यो भविष्यति ।। १४

न च ते राममासाद्य स्थातुं शक्ता निशाचराः ।

क्रुद्धं केसरिणं दृष्ट्वा वनेरण इवैणकाः ।। १५

तेषां न चान्यः काकुत्स्थाद्योद्धुमुत्सहते पुमान् ।

ऋते केसरिणः क्रुद्धान्मत्तानां करिणामिव ।। १६

वीर्योत्सिक्ता हि ते पापाः कालकूटोपमा रणे ।

खरदूषणयोर्भृत्याः कृतान्ताः कुपिता इव ।। १७

रामस्य राजशार्दूल सहिष्यन्ते न सायकान् ।

अनारतगता धारा जलदस्येव पांसवः ।। १८

न च पुत्रकृतं स्नेहं कर्तुमर्हसि पार्थिव ।

न तदस्ति जगत्यस्मिन्यन्न देयं महात्मनाम् ।। १९

हन्त नूनं विजानामि हतांस्तान्विद्धिराक्षसान् ।

नह्यस्मदादयः प्राज्ञाः संदिग्धे संप्रवृत्तयः ।। २०

अहं वेद्मि महात्मानं रामं राजीवलोचनम् ।

वसिष्ठश्च महातेजा ये चान्ये दीर्घदर्शिनः ।। २१

यदि धर्मो महत्त्वं च यशस्ते मनसि स्थितम् ।

तन्मह्यं समभिप्रेतमात्मजं दातुमर्हसि ।। २२

दशरात्रश्च मे यज्ञो यस्मिन्रामेण राक्षसाः ।

हन्तव्या विघ्नकर्तारो मम यज्ञस्य वैरिणः ।। २३

अत्राप्यनुज्ञां काकुत्स्थ ददतां तव मन्त्रिणः ।

वसिष्ठप्रमुखाः सर्वे तेन रामं विसर्जय ।। २४

नात्येति कालः कालज्ञ यथायं मम राघव ।

तथा कुरुष्व भद्रं ते मा च शोके मनः कृथाः ।। २५

कार्यमण्वपि काले तु कृतमेत्युपकारताम् ।

महदप्युपकारोऽपि रिक्ततामेत्यकालतः ।। २६

इत्येवमुक्त्वा धर्मात्मा धर्मार्थसहितं वचः ।

विरराम महातेजा विश्वामित्रो मुनीश्वरः ।। २७

श्रुत्वा वचो मुनिवरस्य महानुभाव-

स्तूष्णीमतिष्ठदुपपन्नपदं स वक्तुम् ।

नो युक्तियुक्तकथनेन विनैति तोषं

धीमानपूरितमनोऽभिमतश्च लोकः ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे विश्वामित्रवाक्यं नाम सप्तमः सर्ग ।। ७ ।।